This electronic edition of the *Mohamudgara* of Śaṅkarācārya, typed for the Gauḍīya Grantha Mandira (`www.granthamandira.org`) by Toke Lindegaard Knudsen, is based on the following source:

- *The Hymns of Śaṅkara*. T. M. P. Mahadevan. Delhi: Motilal Banarsidass Publishers Private Limited, 1980.

Below is a summary of Mahadevan's introduction to his edition and translation of the hymn.

In his edition, Mahadevan follows the edition printed in volume 18 (pp. 62–69) of the Memorial Edition of *The Works of Śrī Śaṅkarācārya*, published by Sri Vani Vilas Press, Srirangam, but some variant readings from other editions have been adopted as well.[1]

According to the tradition, Śaṅkara was once walking in the streets of Vārāṇasī accompanied by fourteen of his disciples when he overheard an elderly scholar reciting grammatical rules.[2] Feeling compassion for the scholar, Śaṅkara approached him and advised him to turn his mind to god and not waste his valuable time on grammar. Śaṅkara is said to have composed twelve verses on that occasion, and the hymn is therefore known as the *Dvādaśamañjarikāstotra*. Furthermore, each of the fourten disciples present added one verse each; these fourteen verses are collectively known as the *Caturdaśamañjarikāstotra*. In addition to these 12+14 verses, a few additional verses (*śeṣa*) have become part of the generally accepted form of the text. The present edition consists of thirty-one verses and bears the title *Mohamudgara*. The hymn is popularly referred to as *Bhaja Govindam* after the opening words of the refrain.

The various printed editions differ in their arrangement of the verses, but in some editions the first twelve verses of this edition constitute the *Dvādaśamañjarikāstotra*, and the twelfth verse is followed by a verse that explains the authorship and occasion for the composition of the hymn:

*dvādaśamañjarikābhir aśeṣaḥ kathito vaiyākaraṇasyaiṣaḥ /*
*upadeśo 'bhūd vidyānipuṇaiḥ śrīmacchaṅkarabhagavaccaraṇaiḥ //*

[1] I have incorporated all the variant readings given by Mahadevan. He has not always indicated their sources, but in so far as he has, I have listed them too.

[2] For the word *ḍukr̥ñkaraṇe*, a grammatical term found in the first verse of the hymn, see Varadarāja's *Laghukaumudī* 722 (Ballantyne's edition), which comments on *Aṣṭādhyāyī* 6.4.42 (*Siddhāntakaumudī* 2504). Mahadevan attributes the phrase to Pāṇini's *Dhātupāṭha*, but I am not sure that this is correct.

Followed by the colophon: *iti śrīguruśaṅkaravijaye śrīmacchaṅkarabhagavatpādavaiyākaraṇasaṃvāde paramahaṃsaparivrājakācāryavaryaśrīmacchaṅkarācāryopadiṣṭadvādaśamañjarikāstotram.*

After verse 27, some editions insert another explanatory verse concluding the *Caturdaśamañjarikāstotra*:

*mūḍhaḥ kaścana vaiyākaraṇo ḍukṛñkaraṇādhyayanadhurīṇaḥ /*
*śrīmacchaṅkarabhagavacchiṣyair bodhita āsīc choditakaraṇaḥ //*

Followed by the colophon: *iti śrīguruśaṅkaravijaye śrīmacchaṅkarabhagavatpādavaiyākaraṇasaṃvāde paramahaṃsaparivrājakācāryavaryaśrīmacchaṅkarācāryājñaptaśiṣyopanyastacaturdaśamañjarikāstotram.*

Regarding the fourteen verses composed by Śaṅkara's disciples, then verse 13 of the present edition is atrributed to Padmapāda, verse 14 to Toṭaka, verse 15 to Hastāmalaka, verse 16 to Subodha, verse 17 to Vārttikakāra (i.e. Sureśvara), verse 18 to Nityānanda, verse 19 to Ānandagiri, verse 20 to Dṛḍhabhakti, verse 21 to Nityanātha, verse 22 to Yogānanda, verse 23 to Surendra, 24ab–25cd to Medhātithi, verse 26 to Bhāratīvaṃśa, and verse 27 to Sumati.

Mahadevan cites from the commentary of Svayamprakāśa Svāmin, a disciple of Gopāla Yogīndra, in his comments to the hymn (apparently the commentary has not published as he used a manuscript in the Government Oriental Manuscripts Library in Madras). Svayamprakāśa's text, called by him the *Dvādaśamañjarikāstotra*, consists of twelve verses, namely verses 2, 29, 8, 4, 11, 3, 18, 26, 12, 13, 24ab–25cd, and 17 in the present edition (in that order).

It is noteworthy that Svayamprakāśa does not give the verse beginning *bhaja govindaṃ* (verse 1), nor mentions the story of the elderly grammarian. Instead of the above verse beginning *dvādaśamañjarikābhir aśeṣaḥ*, Svayamprakāśa gives the following verse after the twelve verses of his text:

*dvādaśamañjarikābhir aśeṣaḥ śiṣyāṇāṃ kathito hy upadeśaḥ /*
*yeṣāṃ naiva karoti vivekaṃ te pacyante narakam anekam //*

It should also be noted that Svayamprakāśa does not refer to the hymn as a *stotra*, but as a *prakaraṇa*, a manual of *Advaita-vedānta.*

Copenhagen, Denmark

3 January 2004

# अथ मोहमुद्गरः

भज गोविन्दं भज गोविन्दं भज गोविन्दं मूढमते ।
सम्प्राप्ते सन्निहिते काले न हि न हि रक्षति डुकृञ्करणे ॥ १॥
मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥ २॥
नारीस्तनभरनाभीदेशं दृष्ट्वा मा गा मोहावेशम् ।
एतन्मांसवसादिविकारं मनसि विचिन्तय वारं वारम् ॥ ३॥
नलिनीदलगतजलमतितरलं[1] तद्वज्जीवितमतिशयचपलम् ।
विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम् ॥ ४॥
यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः ।
पश्चाज्जीवति जर्जरदेहे वार्तां को ऽपि न पृच्छति गेहे ॥ ५॥
यावत्पवनो निवसति देहे तावत्पृच्छति कुशलं गेहे ।
गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये ॥ ६॥
बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीसक्तः ।
वृद्धस्तावच्चिन्तासक्तः परे[2] ब्रह्मणि को ऽपि न सक्तः ॥ ७॥
का ते कान्ता कस्ते पुत्रः संसारो ऽयमतीव विचित्रः ।
कस्य त्वं कः कुत आयातस्तत्त्वं चिन्तय तदिह[3] भ्रातः[4] ॥ ८॥
सत्सङ्गत्वे निःसङ्गत्वं निःसङ्गत्वे निर्मोहत्वम् ।
निर्मोहत्वे निश्चलितत्वं निश्चलितत्वे[5] जीवन्मुक्तिः ॥ ९॥

[1] Svayamprakāśa: ०जललवतरलम्
[2] Some editions: परमे
[3] Other readings: तदिदं and यदिदं
[4] Other readings: भ्रान्तः and भ्रान्त
[5] Some editions: निश्चलतत्वे

वयसि गते कः कामविकारः शुष्के नीरे कः कासारः ।
क्षीणे वित्ते कः परिवारो ज्ञाते तत्त्वे कः संसारः ॥ १० ॥
मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम् ।
मायामयमिदमखिलं हित्वा[6] ब्रह्मपदं त्वं प्रविश विदित्वा ॥ ११ ॥
दिनयामिन्यौ सायं प्रातः शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः ॥ १२ ॥
का ते कान्ताधनगतचिन्ता[7] वातुल किं तव नास्ति नियन्ता ।
त्रिजगति सज्जनसङ्गतिरेका भवति भवार्णवतरणे नौका ॥ १३ ॥
जटिलो[8] मुण्डी लुञ्चितकेशः काषायाम्बरबहुकृतवेषः ।
पश्यन्नपि च न पश्यति मूढो ह्युदरनिमित्तं बहुकृतवेषः ॥ १४ ॥
अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् ॥ १५ ॥
अग्रे वह्निः पृष्ठे भानू रात्रौ चुबुकसमर्पितजानुः ।
करतलभिक्षस्तरुतलवासस्तदपि न मुञ्चत्याशापाशः ॥ १६ ॥
कुरुते गङ्गासागरगमनं व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीनः सर्वमतेन मुक्तिं नः भजति जन्मशतेन ॥ १७ ॥
सुरमन्दिरतरुमूलनिवासः शय्या भूतलमजिनं वासः ।
सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥ १८ ॥
योगरतो वा भोगरतो वा सङ्गरतो वा सङ्गविहीनः ।
यस्य ब्रह्मणि रमते चित्तं नन्दति नन्दति नन्दत्येव ॥ १९ ॥
भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता ।

[6] Svayamprakāśa: बुद्ध्वा
[7] Svayamprakāśa: कान्ताधरगतचिन्ता
[8] Vani Vilas edition: जटिली

सकृदपि येन मुरारिसमर्चा क्रियते तस्य यमेन न चर्चा[9] ॥ २०॥
पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।
इह संसारे बहुदुस्तारे कृपयापारे पाहि मुरारे ॥ २१॥
रथ्याकर्पटविरचितकन्थः पुण्यापुण्यविवर्जितपन्थः[10] ।
योगी योगनियोजितचित्तो रमते बालोन्मत्तवदेव ॥ २२॥
कस्त्वं को ऽहं कुत आयातः का मे जननी को मे तातः ।
इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम्[11] ॥ २३॥
त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि मय्यसहिष्णुः ।
सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदाज्ञानम् ॥ २४॥
शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम् ॥ २५॥
कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं भावय को ऽहम्[12] ।
आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः ॥ २६॥
गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् ।
नेयं सज्जनसङ्गे चित्तं[13] देयं दीनजनाय च वित्तम् ॥ २७॥
सुखतः क्रियते रामाभोगः पश्चाद्धन्त शरीरे रोगः ।
यद्यपि लोके मरणं शरणं तदपि न मुञ्चति पापाचरणम् ॥ २८॥
अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता रीतिः ॥ २९॥
प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम् ।

[9] Alternative reading: कुरुते तस्य यमो ऽपि न चर्चाम्

[10] Another reading: पन्थाः

[11] Alternative reading: इति परिभावितनिजसंसारः सर्वं त्यक्त्वा स्वप्नविचारः

[12] Svayamprakāśa: हित्वात्मानं पश्यत सो ऽहम्; other readings: पश्यति सो ऽहम् and पश्य विमोहम्

[13] Alternative reading: नेयं सज्जनसङ्गतिमनिशम्

जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम् ॥ ३० ॥
गुरुचरणाम्बुजनिर्भरभक्तः संसारादचिराद्भव मुक्तः ।
सेन्द्रियमानसनियमादेवं[14] द्रक्ष्यसि निजहृदयस्थं देवम् ॥ ३१ ॥

फिरङ्गिणा तोकाख्येन परोपकारार्थमिदं पुस्तकं लिखितम् ।श्रीरस्तु ॥

[14]Vani Vilas edition: ०नियमादेव